# हर्यष्टकम्  **hari-aṣṭakam** (haryaṣṭakam)

*Rāmulu Gajavāḍa Saṁskṛtam Teacher*

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः।
अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः॥ १

***hari-rharati pāpāni duṣṭacittair-api smṛtaḥ*** **|**
***anicchayāpi saṁspṛṣṭo dahatyeva hi pāvakaḥ*** **|| 1**

स गङ्गा स गया सेतुः  स काशी स च पुष्करम् ।
जिह्वाग्रे वर्तते यस्य  हरि रित्यक्षरद्वयम्॥ २

***sa gaṅgā sa gayā setuḥ sa kaśī sa ca puṣkaram*** **|**
***jihvāgre vartate yasya  hari rityakṣara-dvayam*** **|| 2**

वाराणस्यां कुरुक्षेत्रे  नैमिशारण्य एव च।
यत्कृतं तेन येनोक्तं   हरि रित्यक्षरद्वयम्॥ ३

***vārāṇasyāṁ kurukṣetre  naimiśāraṇya eva ca*** **|**
***yatkṛtaṁ tena yenoktaṁ  hari rityakṣara-dvayam*** **|| 3**

पृथिव्यां यानि तीर्थानि  पुण्या न्यायतनानि च।
तानि सर्वाण्य शेषाणि  हरि रित्यक्षरद्वयम्॥ ४

***pṛthivyāṁ yāni tīrthāni  nyāyatanāni  ca*** **|**
***tāni sarvāṇya śeṣāṇi  hari rityakṣara-dvayam*** **|| 4**

गवां कोटिसहस्राणि हेमकन्यासहस्रकम् ।
दत्तं स्यात्तेन येनोक्तं हारि रित्यक्षर द्वयम् ॥ ५

*gavāṁ koṭisahasrāṇi hemakanyāsahasrakam* **I**
*dattaṁ syāttena yenoktaṁ hari rityakṣar-dvayam* **II 5**

ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ।
अधीतस्तेन येनोक्तं हरि रित्यक्षर द्वयम् ॥ ६

*ṛgvedo'tha yajurvedaḥ sāmavedo'pyatharvaṇaḥ* **I**
*adhītastena yenoktaṁ hari rityakṣara-dvayam* **II 6**

अश्वमेधै-र्महायज्ञैः नरमेधै स्तथैव च ।
इष्टं स्यात्तेन येनोक्तं हरि रित्यक्षर द्वयम् ॥ ७

*aśvamedhai-rmahāyajñaiḥ naramedhai stathaiva ca* **I**
*iṣṭaṁ syāttena yenoktaṁ hari rityakṣara-dvayam* **II 7**

प्राणप्रयाण पाथेयं संसार व्याधिनाशनम् ।
दुःखात्यन्त परित्राणं हरि रित्यक्षरद्वयम् ॥ ८

*prāṇaprayāṇa pātheyaṁ saṁsāra vyādhināśanam* **I**
*duḥkhātyanta paritrāṇaṁ hari rityakṣara-dvayam* **II 8**

बद्धः परिकरस्तेन मोक्षाय गमनं प्रति
सकृ दुच्चरितं येन हरि रित्यक्षरद्वयम् ॥ ९

*baddhaḥ parikarastena mokṣāya gamanaṁ prati* **I**
*sakṛ duccāritaṁ yena hari rityakṣaradvayam* **II 9**

## फलश्रुति Phalaśruiti

हर्यष्टक मिदं पुण्यं  प्रातरुत्थाय यः पठेत् ।

आयुष्यं बलमारोग्यं  यशो वृद्धिःश्रिया वहम् ॥ १०

*haryaṣṭaka midaṁ puṇyaṁ  prātarutthāya yaḥ paṭhet* ।
*āyuṣyaṁ balamārogyaṁ  yaśo vṛddhiḥ-śriyā vaham* ।। 10

प्रह्लादेन कृतं स्तोत्रं  दुःख सागरशोषणम् ।

यः पठेत् स नरो  याति तद्विष्णोः परमं पदम् ॥ ११

*prahlādena kṛtaṁ stotraṁ  duḥkha sāgaraśoṣaṇam* ।
*yaḥ paṭhet sa naro  yāti tadviṣṇoḥ paramaṁ padam* ।। **11**